International Journal of Sanskrit Research 2021; 7(1): 307-311

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(1): 307-311
© 2021 IJSR
www.anantaajournal.com
Received: 29-10-2020
Accepted: 09-11-2020

**प्रीतिरञ्जन माझी**
संस्कृत विभाग, पाली और प्राकृत, विश्वभारती, शांतिनिकेतन, पश्चिम बंगाल, भारत

**Corresponding Author:**
**प्रीतिरञ्जन माझी**
संस्कृत विभाग, पाली और प्राकृत, विश्वभारती, शांतिनिकेतन, पश्चिम बंगाल, भारत

# भारतीयानां वृक्षचिन्तनम्

## प्रीतिरञ्जन माझी

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i1f.1319

## संधर्व सूची
संप्रति विज्ञानस्य युगेऽस्मिन् परिवेशदूषणं तथा पर्यावरणस्य असन्तुलितावस्था जीवसमुदायानाम् आतङ्कस्य विषयः । विकशितदेशानां महत्वाकांक्षाः विकाशशीलानाञ्च प्रतियोगिताः पर्यावरणस्य कीदृशीं क्षतिं साधयन्तीति विगतवर्षकतिपयेषु घटितानां प्राकृतिकदुर्योगानाम् अनुध्यानेन स्पष्टम्। संप्रति विपर्ययादस्मात् परित्रातुं वृक्षाः एव समर्था इति उपायान्तराभावात् भूखण्डस्थाः देशाः सम्मिलिताः वृक्षाणां रक्षणार्थं चेष्टिताः दृश्यन्ते। अस्मिन् प्रसङ्गे पुराकालात् भारतीयानां प्रयासः उल्लेखयोग्यः। भारतवर्षस्य प्राचीनसंस्कृतेः अनुशीलनेन ज्ञायते भारतीयानां नित्यकरणीयकर्मसु अपि पर्यावरणस्य रक्षणभावना निहिता।
संस्कृतग्रन्थेषु वेदपुराणादिप्राचीनशास्त्रेषु बहवः मन्त्राः श्लोकाश्च वृक्षाणां रक्षणार्थमभिप्रेताः प्राप्यन्ते। वृक्षाणां क्षतिसाधनेन दण्डविधानमपि आसीत्। यथोच्यते आचार्यमनुना –

फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम्।
गुल्मवल्लीलतानाञ्च पुष्पितानाञ्च वीरुधाम्।।

भारतवर्षस्य सांस्कृतिक-अनुष्ठानानि भारतीयानां दैनिकाचरणानि च वृक्षाणां रक्षणे कथं सम्पृक्तानि आसन्निति विस्तृतविषयम् अधिकृत्य संक्षेपेण आलोचयिष्यते प्रस्ताविते लघुप्रबन्धेऽस्मिन्।

**कुट शब्द** - भारतीयसंस्कृतिः, वृक्षः, वृक्षजीवनम्, दण्डनीतिः,वृक्षमहिमा, तुलसी, धात्री, वृक्षाराधना।

## प्रस्तावना
विज्ञानस्य प्रगतिः प्राकृतिकसन्तुलने अन्तरायो भवति। मनुष्यः स्वार्थं साधयितुं वैज्ञानिकप्रयोगार्थं यथेच्छया प्रकृत्याः दुर्विनियोगं करोति। फलतः प्रकृतेः सामान्यावस्थायां परिवर्तनं जायते। पृथिव्याः सुरक्षायां गुरुत्वपूर्णः नभस्थः ओजोनस्तरः क्षीणतां प्राप्नोति, प्रतिनियतं जलवायुः परिवर्तते, गच्छितप्राकृतिकसंपदः ह्रसन्ते, जले भूमौ वायौ च सर्वत्र विषाक्ततत्त्वानि बृद्धिं लभन्ते। प्रकृत्याः अनियन्त्रितो दुर्विनियोगः एवैतेषां विपर्ययाणां कारणम्।
विश्वं न मनुष्यमात्रस्य। इतरान् गृहीत्वैव तस्य स्थितिः। चिन्तनशक्तेः विकासात् कर्मक्षमतायाः बाहुल्याच्च मनुष्येण स्वयं श्रेष्ठजीवत्वेनोद्घोषितः। श्रुतिरपि प्रमाणं यत् सृष्टिकाले मनुष्यस्य नासीत् काचिद्विशेषता। पुरुषसूक्तोक्तायाः[1] सृष्टिप्रक्रियायारनुध्यानेन

[1] ऋक्. 10.90

प्रज्ञायते अन्येषामिव मनुष्यस्यापि उत्पत्तिरभूत् पुरुषात्। किन्तु विस्मृतस्वरूपो मनुष्यो विवेकहीनवदाचरति, सर्वस्मिन् क्षेत्रे आत्मनः प्रभूत्वं प्रदर्शयितुमपरस्य क्षतिसाधनादपि न निर्वर्तते। आधुनिकतायाः मायाजाले आबद्धो मनुष्यः आत्मनः पूर्वजानां संस्कृतिः हेया इति मन्यमानः विनाशं प्रति अग्रे सरति। अस्याः समस्यायाः समाधानं भारतीयानां प्राचीनसंस्कृतौ परम्परायाञ्च विधृतम्।

संस्कृतिरिति शब्दो व्यापकार्थकः। क्षेत्रविशेषे वसवासकारिणां साम्प्रदायिकविचारधारा-सभ्यता-कला-सामाजिकप्रथा-शासनव्यवस्था-परम्परा-धर्म-दर्शनादीनि संस्कृतिभुक्तानि तथा संस्कृत्याः एव प्रकटितरूपाणि। संस्कृतिः जीवनधारणस्य धारा भवति। उत्कृष्टपरम्परायाः समुन्नतसंस्कृत्याः भूमिः भारतवर्षः। प्राचीन-ऐतिह्यावलोकनेन भारतवर्षस्य गौरवमयी स्थितिः तथा भारतीयानां सुसंस्कृता जीवनधारा स्पष्टीयेते। अस्याः पूतभूमेः पुण्यगाथा अधुनातनगवेषकानपि विस्मयमावहति। पुरा संस्कृतमासीत् भारतीयानां कथितभाषा अतः तेषां सुसंहतजीवनचर्या संस्कृतेनैव नियन्त्रिता आसीदिति भारतीयसंस्कृतिरासीत् संस्कृतकेन्द्रिका। भारतवर्षः शिक्षा-संस्कृति-ज्ञान-विज्ञान-अर्थनैतिक-सामाजिकदृष्ट्या च विश्वस्य अन्येषु भूभागेषु उन्नततरः आसीत्। अस्य स्वातन्त्र्यं वैदेशिकैरपि भज्यते। उन्नतेः चरमस्थितौ स्थितः अपि भारतवर्षः प्राकृतिकसम्पदां रक्षणे सर्वदा कृतप्रयत्न आसीत्। विश्वे भारतवर्षस्य काष्ठाप्रदर्शनाय अद्यापि संस्कृते पर्याप्तकारणानि अवशिष्टानि वर्तन्ते। अस्मिन् लघुप्रबन्धे संस्कृतशास्त्रादिन् आधारीकृत्य वृक्षसंरक्षणे भारतीयसंस्कृत्याः भूमिका आलोचयिष्यते।

सृष्टेः रक्षणे यानि प्राकृतिकतत्त्वानि महत्वपूर्णां भूमिकां निर्वहन्ति तेषु वृक्षः मूर्धन्यस्थानीयः। वृक्ष एव प्राणिनां प्राणाधारः। जगति प्राणसंचारस्य मूख्यकारणानि पञ्चमहाभूतानि वृक्षमाध्यमेन हि संरक्षितानि शुद्धानि भवन्ति। भूमिमध्ये जलसञ्चरणे वृक्षमूलानां महती भूमिका अस्ति। तृणाच्छादितदेशापेक्षया तृणहीनदेशे भूमिः अधिका रुक्षा सारहीना च प्रतीयते। पर्णानि वायुमण्डलेभ्यः क्षतिकरतत्त्वानि आकृष्य धारयित्वा च वायुं शुद्धीकुर्वन्ति। सर्वे प्राणिनः सूर्यकरप्रभावात् परित्राणार्थं वृक्षछायामेवाश्रयन्ति। एवं क्षित्यप्तेजसादिनां परिष्करणं शुद्धिकरणं वा वृक्षेभ्यः सम्भवति। अतः नैष आश्चर्यकरः यत् भारतवर्षवत् ग्रीष्मप्रधानदेशे वृक्षेषु दैवीशक्तिः कल्प्यते।

यद्यपि संप्रति परिदृश्यमानाः पर्यावरणसंबन्धिताः समस्याः पुरा प्रबलाः नासन् तथापि सृष्टेः रक्षणे परिचालने वृक्षाणां कीदृशी भूमिका वर्तते इति विषये अवगताः अस्माकं पूर्वजाः पर्यावरणस्य संरक्षणविषये सचेतनाः आसन्। अतः साहित्यदर्शनादिशास्त्रेषु कथा-आख्यायिकासु दैनिक-आचाराचरणेषु च अविच्छेद्याङ्गरूपेण भारतीयसंस्कृत्या सह वृक्षाणां सम्बन्धो बलवद्दृश्यते। भारतवर्षस्य सर्वे सम्प्रदायाः सर्वाणि शास्त्राणि सर्वे धर्मावलम्विनः च स्वस्वक्षेत्रेषु वृक्षान् महत्वपूर्णस्थाने संस्थाप्य तेषां संरक्षणाय यत्नशीलाः दृश्यन्ते।

आदिकालतः वृक्षः प्रत्यक्षतया परोक्षतया च जीवेन जीवनेन च सह संश्लिष्टः। भारतीयानां प्रकृतिनिर्भरजीवनचर्यायाः केन्द्रस्थलम् एव वृक्षः। नैषः केवलं मनुष्याणां किन्तु मनुष्येतराणामपि जीवाधारः अस्ति। अतः तैत्तिरीयोपनिषदि कथ्यते – 'पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नात्पुरुषः' [2] इति। वैदिकऋषिभिरपि ज्ञातमासीत् यत् वृक्षहीनतया सृष्टेरस्तित्वमसम्भवम्। अतः वृक्षं देवस्थाने संस्थाप्य स्तूयते, तेभ्यो जगतः मङ्गलं च काम्यते।, मुक्तकण्ठेन वृक्षस्य स्तुतिर्गीयते, तस्य समृद्धिश्च काम्यते – माध्वीर्न सन्वोषधीः [3], मधुमान्नो वनस्पतिः [4] इत्यादिभिः।

अचेतनापेक्षया सचेतनैः सह प्राणिनां सम्बन्धो दृढो भवति। अतः अचलेषु अपि वृक्षेषु प्राणास्तित्वं भवितुमर्हतीति प्राचीनमनीषीणां मनसि उद्भासितम्। फलतः बहुप्राचीनकालादेव भारतीयविद्वद्भिः वृक्षेषु चेतनायाः अस्तित्वं प्रतिपादितम्। तेषां प्राणवत्त्वं सम्प्रति आधुनिकविज्ञाने अपि सिद्धम्। स्वरचिते पुस्तके[5] तथ्यमिदं प्रमाणीकृत्य जगदीशचन्द्रवसुमहोदयः विज्ञानजगति अविस्मरणीयो भवति। जैनदार्शनिकाः जीवितप्राणिषु वृक्षान्नपि अन्तर्भावयन्ति। अत्रोल्लेख्यं प्रसिद्धं जैनसूत्रं – पृथिव्यप्तेजोवायुवनस्पतयः स्थावराः[6]। भारतीयसंस्कृतेः आधारशिलारूपेण प्रसिद्धे महाभारते अपि युक्तिसमर्थितं वृक्षाणां चेतनत्वं प्रमाणितं दृश्यते। तत्र मनुष्यादिवत् वृक्षाः पञ्चभूतादुत्पन्नाः तथा तेषामपि पञ्च इन्द्रियाणि विद्यन्ते इति प्रतिपाद्यते।

जडवत् प्रतीयमाना अपि वृक्षाः सचेतनाः। मनुष्यादयः यथा अनुभवन्ति तथैव वृक्षादिभिरपि सुखदुःखादयः अनुभूयन्ते। अतः आचार्यमनुना उक्तम् – 'अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः'[7]। वृहदारण्यकोपनिषदि पुरुषेण सह साम्यमुक्तम् – यथा 'वृक्षो वनस्पतिस्तथैव पुरुषोऽमृसा। तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः।।[8] वृक्षेषु आकाशो विद्यते येन फलपुष्पाणाम् उत्पत्तिः सम्भवति। इतराः यथा अग्नितापेन म्लायन्ते तथैव वृक्षस्य पर्णानि, पुष्पाणि फलानि च तापकारणात् शीर्यन्ते इत्यतो वृक्षेषु स्पर्शनक्षमता अनुमेया। यथोक्तं व्यासदेवेन – 'ऊष्मतो

---

[2] तै.उ. ब्रह्मवल्ली.1

[3] ऋक् 1.90.6

[4] ऋक् 1.90.8

[5] Response in the Living and Non-living

[6] तत्वार्थसूत्र 2.13

[7] मनुस्मृति 1.49

[8] वृह.उ. 3.9.27.1-7

म्लायते पर्णं त्वक् फलमेव च। म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते' [9]।
व्योम्नि विद्युत्स्फुरणेन मेघगर्जनेन च वृक्षाः फलपुष्पैः सम्पन्नाः भवन्ति। कालिदाससाहित्ये अपि विषयोऽयं सङ्केतितः यत् मेघगर्जनेन भूमौ नवाङ्कुरा उपजायन्ते - 'कर्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामबन्ध्याम्'[10] इत्यादौ। क्वचित् तीव्रशब्देन वृक्षेषु फलपुष्पाणां विनाशः अपि दृश्यते अतः वृक्षाः शब्दान् गृह्णन्ति इति सिद्धम्। रोगाणां प्रादुर्भावे वृक्षायुर्विद्भिः विविधैः गन्धधूपैः पीडितवृक्षाणाम् उपचारः क्रियते, वृक्षमूलेषु नानारसयुक्तलेपाः प्रयुज्यन्ते, येन वृक्षेषु घ्राणशक्तिः रसास्वादनक्षमता च ज्ञायेते। इन्द्रियासकलानां विद्यमानात् महाभारते स्पष्टं वृक्षाणां सजीवत्वम् उद्घोषितम् -'सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्। जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।।'[11]
विश्वं विविधविचित्रैः विमण्डितम्। संसारे सर्वे पार्थिवाः चेतनाः अचेतनाश्च परस्पराश्रिताः एव प्रवर्तन्ते। अपरस्य हानिः परोक्षेण आत्मनः हानिमावहति। सम्वेदनशीलान् प्रति अत्याचारः भारतीयसंस्कृतिविरुद्धः। अहिंसया सर्वप्राणिषु समदर्शिता एव भारतीयसंस्कृतेः प्रतिपाद्या। पुराकाले चिकित्सार्थम् ओषधिसंग्रहकाले खननकर्त्रा सविनयं खननस्य प्रयोजनं निवेदयन् आत्मनः जीवसकलस्य च कुशलकामना कृता दृश्यते -' मा वो रिषत्खनिता यस्मै चाहं खनामि वः। द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम्।। [12] अस्मात् वृक्षैः सह मनुष्यस्य आत्मीयता अनुमेया। वृक्षेतराणां जीवितानां हननं यथा पापावहं तथैव वृक्षाणां क्षतिसाधनमपि महादोषतया परिगणितमासीत्। एतदर्थं प्राचीनशासनव्यवस्थायां निर्दिष्टानि दण्डविधानानि वृक्षाणां संरक्षणं प्रति भारतीयानां कृतबद्धतां सूचयन्ति। आचार्यो मनुः फलदानां वृक्षाणां गुल्मवल्लीलतानां पुष्पितानां वीरुधां च कर्तनं सर्वथा निषिद्धमिति कथितवान्। तस्य अन्यथाकरणेन याज्ञवल्क्येन अर्थदण्डो विहितः – 'प्ररोहिशाखिनां शाखास्कन्धसर्वविदारणे। उपजीव्यद्रुमाणां च विंशतेर्द्विर्गुणो दमः।।[13] मनुना तु एतदर्थम् ऋक्शतं जप्यमिति विधानं कृतम्। वृक्षपीडनरूपस्य पापस्य प्रायश्चितरूपेण तेन उक्तमेतत् –
फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम्। गुल्मवल्लीलतानां च पुष्पितानाञ्च वीरुधाम्।।[14]
कर्षितभूमौ आरोपितवृक्षवत् वने स्वयंजाताः वृक्षाः अपि समरूपेण महत्वपूर्णाः भवन्ति। अतः तादृशानां वृक्षाणां क्षतिसाधनमपि दण्डनीयम्[15]। प्राचीनकाले मनुष्यः सम्पूर्णतया वृक्षनिर्भरः आसीत्। अरण्येभ्यो वनजातद्रव्याणि संगृह्य जीविकां निर्वहन्ति स्म। किन्तु प्रयोजनमतिरिच्य इन्धनार्थमपि अशुष्काणां द्रुमाणाम् अवपातनं पापमिति परिगण्यते[16]। पुण्यस्थानेषु सुरालयेषु श्मशानसीमासु द्रुमाणां कर्तने अपि अर्थदण्डो निर्दिष्टः आसीत्[17]।
प्रयोजनमनुद्दिश्य कोऽपि कस्मिंश्चित् कर्मणि न प्रवर्तते। वृक्षाः मानवसभ्यतायाः अस्तित्वे कीदृशीं भूमिकां निर्वहन्ति इति सर्वे जानन्ति। तथापि स्वार्थान्धो मनुष्यः वृक्षाणां संबर्धनार्थं रक्षणार्थं परिपालनार्थं च उद्बोधकमपेक्ष्यते। अतः न केवलं वृक्षाणां रक्षणार्थं नियमाः प्रणीताः किन्तु पुराकाले तेषां परिपालनार्थं बर्धनार्थमपि बहुप्रयत्नाः साधिताः दृश्यन्ते। शास्त्राणि पुरुषार्थैः सह वृक्षान् संयोज्य वृक्षरोपणार्थमनुप्रेरयन्ति। वेदपुराणादिप्राचीनशास्त्रेषु एवं बहवः दृष्टान्ताः प्राप्यन्ते यत्र वृक्षरोपणस्य सुफलं वर्णितम्। धार्मिकानुष्ठानैः सह विश्वासेन च सह युक्त उपदेशः सर्वैः अनुक्रियते। अतः प्राचीनभारतीयशास्त्रेषु मानवेतरप्राकृतिकविषयाः येषां संरक्षणमत्यावश्यकम् ते अलौकिकशक्तिसम्पन्ना इति वर्णिताः दृश्यन्ते। वेदेषु बहुमन्त्राः प्राप्यन्ते यत्र वृक्षः अरण्यं वनम् औषधीः इत्येतेषु अधिष्ठातृदेवाः सम्बोधिताः स्तुताश्च। यथा नमो वृक्षेभ्यः, वनानां पतये नमः,वृक्षाणां पतये नमः[18] इत्यादिः। अरण्यस्य अधिष्ठात्री देवी अरण्यानीति कथनम् ऋग्वेदे प्राप्यते। आवैदिककालात् वनं वासस्थानरूपेण अपि च अन्नादिनां नित्यव्यवहार्यद्रव्याणां च उत्सरूपेण मानवजीवनेन सह युक्तमस्ति।वनाञ्चलस्य संरक्षणेन वृक्षाणां वनजसम्पदां पश्वादिवनवासिवर्गाणां रक्षणं साध्यते। तदर्थम् अरण्यानि संरक्षितव्यानि। अतः अरण्यानिदेव्याः गुणकीर्तनं क्रियते –

> न वा अरण्यानिर्हन्त्यश्चेन्नाभिगच्छति। स्वादोः फलस्य जगध्वाय यथाकामं नि पद्यते।।[19]

अरण्यं मातृवत् पशूनां पालनं करोति। सुरभिं वितरयन् सर्वान् तोषयति। अकर्षितमपि फलमूलानां भाण्डारो भवति। अतः वैदिक-ऋषिभिः अरण्ये देवत्वमारोप्य उदात्तकण्ठैः अरण्यदेव्याः स्तुतिः गीयते –

> आञ्जनगन्धिं सुरभिं बह्वनामकृषीवलाम्। प्राहं मृगाणां मातरमरण्यानिमशंसिषम्।।[20] इति।

[9] महा.शान्ति. 184.11
[10] मेघदूत.पूर्व.11
[11] महा.शान्ति. 184.17
[12] ऋक्10. 97.20
[13] याज्ञ.स्मृति. 2.227
[14] मनुस्मृति 11.143
[15] तत्रैव 11.145
[16] तत्रैव 11.65
[17] याज्ञ.स्मृति. 2.228
[18] शुक्ल.यजुः.16.17-19, 34
[19] ऋक् 10.146.5
[20] तत्रैव 10.146.6

भारतीयसंस्कृतौ बहवः वृक्षाः पूज्याः इति मान्यताप्राप्ताः। पुराणेषु बहवः वृक्षाः धर्मेण युक्ताः दृश्यन्ते। तत्र वृक्षाणाम् उपासनार्थं विधयः अपि निरुपिताः। वृक्षेषु देवानां वासोऽस्तीति भारतीयानां विश्वासः। दृष्टान्तः यथा तुलसी। विश्वे तुलसीवत् पवित्रतमं न किञ्चिदस्तीति अस्याः एवं नामाभिधानम्[21]। भारतवर्षे वृक्षोऽयं वृन्दावती विष्णुप्रिया वेति नाम्ना प्रतिगृहं पूज्यते। विषुदेवेन सह अस्य पौराणिकसम्पृक्तिः वर्तते। अतोऽयं हरिवृक्ष इति कथ्यते। ब्रह्मवैवर्तपुराणे[22] आख्यानमस्ति विष्णुना हृतधर्मा सती तुलसी वृक्षरूपेण पृथिव्याम् अजायत। तस्यास्तनुः गण्डकी तथा केशाः तुलसीवृक्षाः अभवन्[23]। तया शापितो विष्णुरपि प्रस्तराकारेण भुवि अवतीर्णः अभवत्। अद्यापि गण्डकीनद्याः तीरवर्तिस्थानेषु वसवासकारिभिःगण्डजातीय-आदिवासिभिः गण्डकीनद्याः प्राप्ताः शिलाः विष्णोरवतारशालग्रामनाम्ना तथा तुलसीदेवी पवित्रतमा वृक्षरूपिणीति पूज्येते।

तुलस्याः पुष्पाणि पर्णानि च देवपूजने अग्राधिकारं प्राप्नुवन्ति। कथ्यते तुलसीवृक्षस्य मूले सर्वेषां तीर्थानाम् अवस्थानमस्ति, सर्वे देवाश्च तत्र वसन्ति। तुलसीपत्रस्य मध्यस्थलेषु विष्णोः, पत्राग्रेषु शिवः, पुष्पेषु लक्ष्मीसरस्वत्यादिदेवपत्नयः तच्छायायान्तु इन्द्राग्न्यादिदेवाः वसन्ति। तुलसीपत्रतोयेन यस्य अभिषेको भवति सः सर्वतीर्थस्नातः सर्वयज्ञेषु दीक्षित इति परिगण्यते। तुलसीपत्रदानेन हरिः अत्यन्तो प्रसन्नो भवति। अनेन दाता गवायुतदानस्य पुण्यं लभते। मृत्युकाले यः तुलसीपत्रं जलं च लभते सः मरणादनन्तरं पुण्यलोकं गच्छति। अयं परम्परा अद्यापि प्रचलिता दृश्यते। मरणासन्नस्य मुखे तुलसीजलम् अधुनापि भारतीयसंस्कृतेः अङ्गः। यो नरः तुलसीं दत्वा हरिमाराधयति लक्षाश्वमेधजं पुण्यं लभते। तुलसीकाष्ठनिर्मितां मालां यो धारयति जीवनान्ते विष्णुलोकं ब्रजति।तुलसी अत्यन्ता पावनीति सूचिता। एषा भारतीयानामाराध्या।

कार्तिकमासस्य पूर्णिमायां तुलसीपूजा अनुष्ठीयते। आयुर्वेदशास्त्रे वृक्षस्यास्य बहूपयोगिता स्वीकृता। तुलसीसंस्पृष्टो वायुः संक्रामकरोगान् बाधते। कथितमस्ति – तुलसीगन्धमादाय यत्र गच्छति मारुतः। दिशो दश पुनात्याशु भूतग्रामांश्चतुर्विधान्।। सम्भवतः अयं विश्वासो मृतकस्य शरीरे तुलसीदानं प्रति प्रमाणम्। तुलसीपत्रस्थापनेन भक्षान्नानि अदृष्टानि भवन्तीति मत्या अधुनापि चन्द्रग्रहणे सूर्यपरागे च खाद्यान्ने तुलसी स्थाप्यते। यस्मिन् स्थाने तुलसीबीजानि पतन्ति तत् पितृपुरुषाणां प्रियमित्यतः तुलसीकाननोद्भूतछायायां श्राद्धो विधीयते। पूर्णिमायाम् अमायां द्वादश्यां रविसंक्रमकाले अशुच्यवस्थायां रात्रौ संन्ध्याकाले मध्याह्ने च तुलसीचयनं निषिद्धम्। एतादृशस्य पावनवृक्षस्य रोपणं पालनं दर्शनं स्पर्शनं वाङ्मनःकायसञ्चितं पापं दूरीकरोति इति पौराणिकमतम्। प्रभुपादेन भक्तिवेदान्तस्वामिना तुलस्याः महत्त्ववर्णनकाले उक्तम् –

In India every Hindu, even those not belonging to the Vaisnava group, take special care of the tulasi tree. Even in great cities where it is very difficult to keep a tulasi tree, people are to be found very carefully keeping this plant. They water it and offer obeisance to it, because worship of the tulasi tree is very important in devotional service [24]

तुलसीवत् बहुप्रसंशितः अपरोऽस्ति धात्रीवृक्षः। आमलकी आमलको वेत्येतस्य आधुनिकाभिधानम्। पद्मपुराणस्य सृष्टिखण्डे अस्य माहात्म्यं वर्णितं दृश्यते। अस्य रोपणात् रोपयिता जन्ममरणबन्धनात् मुक्तो भवति। यदुक्तम् –

> धात्रीफलं परं पूतं सर्वलोकेषु विश्रुतम्। यस्य रोपान्नरो नरो मुच्यते जन्मबन्धनात् ।।[25]

धात्रीफलं परमं पवित्रम्। अस्य भक्षणात् आयुर्बर्धते। फलमस्य भक्षणार्थं, रसस्तस्य पानार्थं स्नानार्थं च व्यवह्रियते। एकादश्यां तिथौ धात्रीरसेन स्नानम् अधिकं पूण्यप्रदमिति कथ्यते। अस्यां तिथौ धात्रीव्रतस्य अनुष्ठानं निर्दिष्टम्[26]। तदनुसारं शुक्लपक्षे कृष्णपक्षे वा एकादश्यां तिथौ उपवासपूर्वकं यः धात्रीं पूजयति तस्य जन्मजन्मान्तरकृतं पापं विनश्यति। स अनन्तपुण्यवान् अक्षयं स्वर्गं लभते। अस्य दर्शनं तीर्थोदकस्नानस्य पुण्यं प्रापयति। अयमपि विष्णोः प्रियः इति निर्दिष्टः। अतः वैष्णवानां कृते धात्री बहुमान्या। अस्याः दर्शनेन स्पर्शनेन नाम्नः उच्चारणेन विष्णुः प्रीतो भवतीति विश्वासः।

गृहस्य समीपवर्तिस्थानेषु धात्रीवृक्षस्य अवस्थानं मङ्गलकरम्। अनेन प्रेत-दैत्य-राक्षसाः दूरीभवन्ति। वस्तुतस्तु धात्रीसंस्पृष्टो वायुः रोगाणूनां विनाशकः। वृक्षोऽयं सर्वदेवानां निवासस्थानमिति पौराणिकमतम्। यत्र धात्रीफलं तत्र केशवः अवतिष्ठति। तादृशस्थाने ब्रह्मणः लक्ष्म्याः च वासोऽस्तीति कथ्यते। अतः गृहासमीपे अस्यावस्थानेन देवानां शुभदृष्ट्या अनिष्टं वार्यते। यथाम्नातम् –

> धात्रीफलं च यत्रास्ति तत्र तिष्ठति केशवः। तत्र ब्रह्मा स्थिरा पद्मा तस्मात्तां तु गृहे न्यसेत्।।

[21] ब्र.वै.पु, प्र.ख, 22.25
[22] तत्रैव 21.32
[23] तत्रैव 21.57
[24] A.C Bhaktivedanta Swami, The Nectar of devotion, P-101.
[25] पद्मपुराण, सृष्टिखण्ड,58.2
[26] पद्मपुराण, सृष्टिखण्ड,58.11

अलक्ष्मीर्नश्यते तत्र यत्र धात्री प्रतिष्ठति। संतुष्टाः सर्वदेवाश्च न त्यजन्ति क्षणं मुदा।।[27]

न केवलं तुलस्याः धात्र्याः वा किन्तु अन्येषामपि बहुवृक्षाणां सांस्कृतिकं धार्मिकम् आध्यात्मिकञ्च गुरुत्वं प्राचीनशास्त्रेषु वर्णितं प्राप्यते। पर्यावरणस्य संरक्षणं प्रति सर्वेषां दृष्टिमाकर्षयितुं पुराणेषु ये विषयाः वर्णिताः, यद्यपि आधुनिकपाठकेषु अतिरञ्जिताः प्रतीयन्ते तथापि तत्काले एते एव विषयाः वृक्षाणां संरक्षणं प्रति महत्वपूर्णां भूमिकाम् अधारयन्। वृक्षाणां क्षतिसाधनं पापावहं रक्षणं तु पुण्यप्रदमिति मत्या जनाः पापकार्येभ्यो विरतास्तिष्ठन्ति, येन प्रकृत्याः रक्षा साध्यते। एतदेवकारणं यस्मात् महत्प्रयोजनमभिलक्ष्य सुधीभिरपि अतिप्रशंसा दोषतया न गण्यते। एतदपि ध्येयं यत् तुलसीधात्र्यादयः ये वृक्षाः पुराणादिशास्त्रेषु बहुप्रसंशिताः तेषां लौकिकगुणानि अधुनापि अनस्वीकरणीयानि। आधुनिकविज्ञाने तेषां वृक्षाणां बहूपयोगिता सिद्धा। केशबर्धने धात्रीफलस्य रसः सहायकः।

वृक्षेषु न केवलम् अलौकिकशक्तिः कल्पिता अधिकन्तु दृष्टार्थसाधकत्वेनापि वनस्पतयः प्रशंसिताः आसन्। यथा देवीकल्या माता आपदेभ्यः सन्तानं त्रायते सुखे दुःखे च सर्वदा सेवते। तथैव वृक्षाः अपि मातृकल्पा मृत्योर्मुखादपि प्राणान् त्रायते। अतः उच्यते – ओषधीरिति मातरस्तद्वो दैवीरूप ब्रुवे[28]। औषधीयगुणसम्पन्नाः वृक्षाः रोगार्तानां रक्षाकर्तारः भवन्ति। वैदिककाले रोगः पापफलम् अथवा राक्षसादिनाम् उपद्रवः इति मतिरासीत्। दिव्यगुणसम्पन्नाः ओषधयः तान् रोगकारकतत्त्वानि विनश्य प्राणान् रक्षन्ति। अतः रोगेभ्यः परित्राणाय पापनाशकाः वनस्पतयः स्तुताः – याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः।।[29]

पुराणसाहित्ये वृक्षाणां माहात्म्यं प्राचुर्येण वर्तते। तत्र वृक्षाः पुत्रवत् पालनीयाः इति उपदिश्यते। मत्स्यपुराणे पार्वतीमुखात् श्रुयते – दशकूपसमा वापी दशवापीसमो ह्रदः। दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः।। प्राचीनकालात् भारतीयैः वृक्षाणां महत्वं ज्ञातमासीत्। वेदे अपि तत्सुरक्षार्थं विधीयते – मौषधीर्हिंसी। वृक्षाणां प्ररोहणे मानवसभ्यतायाः प्रगतिः निहिता इत्यतः आत्मनः समृद्ध्याकांक्षी वैदिक-ऋषिः सततं गायति – अतस्त्वं देव वनस्पते शतवल्शो वि वयं रुहेम।।[30]

संप्रति देशानां मध्ये विकाशप्रतियोगिता चलति। प्रतिजनम् आये बृद्धिं, शिल्पसंस्थानानां बर्धितसंख्यादिकं च वीक्ष्य कः देशः प्रगतिशीलः कश्च अनग्रसरः इति परिगण्यते। किन्तु तेन प्रकृत्याः कीदृशी क्षतिः साध्यते तद्विषये कस्यापि चिन्ता नास्ति। फलस्वरूपं विगतवर्षकतिपयेषु वारम्वारं प्राकृतिकदुर्योगेभ्यः बहुजनजीवनं क्षतिग्रस्तम्। अनेन न केवलं मनुष्यस्य अपितु मनुष्येतराणामन्येषां जीवजातानामपि प्रभूतक्षतिः साध्यते। वृक्षकुलस्य रक्षणाय बहुविद्वांसः तद्विषयकगवेषणायाम् आत्मानं नियोजितवन्तः। फलस्वरूपम् आवैदिककालात् वृक्षाणां विभाजनं वर्गीकरणादिविषयाः अधिकाधिकं प्राकाश्यानीताः।

[27] पद्मपुराण, सृष्टिखण्ड,58.14-15

[28] शुक्ल.यजुः, 12.78

[29] ऋक्10.97.15

[30] शुक्ल.यजुः, 5.43

## परामृष्टाः ग्रन्थाः


1. Bose JC. Responce in the living and non-living. Longmans, Green and Co., Bombay, 1902.
2. Dvivedi Girija Prasad. Manusmriti. The Newul Kishore Press, Lucknow 1917, 11, 408, 421, 422.
3. Kalidas Ed. Kale MR. The Meghadūta. Bombay, 1947, 9.
4. Swami A.C. Bhaktivedanta. The Nectar of Devotion. ISKCON Press, Boston, 1970, 101.
5. Umaswami Ed. Vijay Jain K. Tattvārthasūtra. Vikalp Printers, Dehradun, 2018, P.77.
6. नारायण विश्वनाथ. पद्मपुराण. आनन्दाश्रममुद्रणालय, 1894, पृ.1172.
7. पांशिकर वासुदेवलक्ष्मण. शुक्लयजुर्वेदसंहिता. निर्णयसागरप्रेस, मुम्बई, 1912, पृ.96, 232, 298,302.
8. पाण्डेय उमेशचन्द्र. याज्ञवल्क्यस्मृतिः. चौखम्भा संस्कृत संस्थान, वाराणसी, वि.सं. 2050,पृ.351
9. भट्टाचार्य जीवानन्दविद्यासागर. ब्रह्मवैवर्त्तपुराणम्. खण्ड 1, कलिकाता, 1888, पृ.339, 341,348.
10. रायवाहादूर जालिमसिंह. वृहदारण्यकोपनिषद, नवलकिशोर प्रेस, लखनउ, पृ.426-431.
11. वामनशास्त्री. तैत्तिरीयोपनिषत्सटीकशाङ्करभाष्योपेता. आनन्दाश्रममुद्रणालय, शालि.शक 1811, पृ.48.
12. शास्त्री रामनारायणदत्त. महाभारत. खण्ड 5, गीताप्रेस, गोरखपुर, पृ. 4893, 4894.
13. सातवलेकर दामोदर. ऋग्वेद का सुबोधभाष्य. भाग 1,4, स्वाध्यायमण्डल, पारडी, 1985, पृ - 215, 216, 220, 296.